# Yajurvedakrita Shiva Stuti

# યજુર્વેદકૃતા શિવસ્તુતિઃ

## Document Information

Text title : Yajurvedakrita Shiva Stuti

File name : yajurvedakRRitAshivastutiH.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | IshAkhyaH dvAdashamAMshaH | adhyAyaH 3 RigvedayajurvedakRitastutiH | 31.2-117 ||

Latest update : December 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 28, 2024

*sanskritdocuments.org*

# યજુર્વેદકૃતા શિવસ્તુતિઃ

(શિવરહસ્યાન્તર્ગતે ઈશાખ્યે)

યજુર્વેદ ઉવાચ ।

યસ્માત્પરં નાપરમસ્તિ શમ્ભોર્જ્યાયાન્નાણુર્ન ચૈવ હિ ॥ ૩૧.૨॥

સ હિ વૃક્ષ ઇવ સ્તવ્ધસ્તસ્ય શાખાઃ સુરાસુરાઃ ।
તેન પૂર્ણમિદં વિશ્વં સદેવાસુરમાનુષમ્ ॥ ૩૨॥

ઈશાવાસ્યમિદં સર્વં યત્કિઞ્ચ જગત્યાં જગત્ ।
તેન ત્યક્તેન ભુઞ્જીથા મા ગૃધાન્યં સુરાન્તરમ્ ॥ ૩૩॥

યો વેદાદૌ સ્વરઃ પ્રોક્તો વેદાન્તે ચ પ્રતિષ્ઠિતઃ ।
તસ્ય પ્રકૃતિલીનસ્ય યઃ પરઃ પરમેશ્વરઃ ॥ ૩૪॥

વિશ્વાધિકો મહર્ષિશ્ચ મહાદેવો મહેશ્વરઃ ।
હિરણ્યગર્ભં દેવેશો જનયામાસ પૂર્વતઃ ॥ ૩૫॥

સમદેવો મહાદેવો બુદ્ધ્યા દેવઃ કરોતુ વઃ ।
સદ્યોજાતં પ્રપદ્યામિ સદ્યો જાતાય વૈ નમઃ ॥ ૩૬॥

વામદેવાય જ્યેષ્ઠાય નમઃ શ્રેષ્ઠાય શમ્ભવે ।
અઘોરાય ચ ઘોરાય હરાયાથ નમો નમઃ ॥ ૩૭॥

તત્પૂર્ષાય મહિમ્નૈવ મહાદેવાય ધીમહિ ।
ઈશાનઃ સર્વવિદ્યાનાં પતિર્ભૂતપતિઃ શિવઃ ॥ ૩૮॥

બ્રહ્મણોઽપિ પતિઃ શમ્ભુરોઙ્કારાર્થૈકવાચકઃ ।
યતો વાચો નિવર્તન્તે અપ્રાપ્ય મનસા સહ ॥ ૩૯॥

આનન્દં દેવદેવસ્ય વિદ્યાન્નો ભયમાવિશેત્ ।
નમસ્તે રુદ્રરૂપાય મન્યવે ચ નમોનમઃ ॥ ૪૦॥

ઇષવે પ્રણમામ્યદ્ય તદ્બાહુભ્યાં નમો નમઃ ।
મેરુમધ્યસ્થહસ્તાય ધન્વને તન્નમો નમઃ ॥ ૪૧॥

તચ્છરવ્યાય ચ નમસ્તથા માં પાતુ શઙ્કરઃ ।
યા તસ્ય સા તનુર્માં હિ પાપાન્માપાપકાશિની ॥ ૪૨॥

તયા માં તનુવા શમ્ભુર્ગિરીશોઽવતુ સર્વદા ।
યા તદ્ધસ્તે ઇષુર્માશ યો બિભર્તિ મહેશ્વરઃ ॥ ૪૩॥

શિવાં તાં ગિરિશઃ કુર્યાન્મામહિંસતુ સર્વદા ।
શિવેન વચસા દેવં સ્તૌમિ નિત્યં સનાતનમ્ ॥ ૪૪॥

અયક્ષ્મ તેન સત્યેન મમ વાક્ સમ્ભવિષ્યતુ ।
અધ્યવોચન્મહાદેવો મયિ તુષ્ટેન સર્વદા ॥ ૪૫॥

પ્રથમો દેવ ઈશાનો ભયરુક્ ભિયમુત્તમઃ ।
મમ શત્રું નિવાર્યાશુ તાન્દધાતુ ચ જમ્ભયોઃ ॥ ૪૬॥

અસૌ સૂર્યાન્તરાઽતિષ્ઠત્તામ્રો અરુણ ઈશ્વરઃ ।
બભ્રુઃ સુમઙ્ગલઃ શર્વો સર્વરુદ્રાવૃતઃ શિવઃ ॥ ૪૭॥

તમેવમીડે દેવેશં સર્પન્તં પરમેશ્વરમ્ ।
નીલગ્રીવં મહાદેવં નીલલોહિતમીશ્વરમ્ ॥ ૪૮॥

ગોપાઃ પશ્યન્તિ દેવેશં ભવન્તો મોહમાસ્થિતાઃ ।
ઉદાહાર્યોઽપિ પશ્યન્તિ હૃદિ વા યોઽહમાસ્થિતઃ ॥ ૪૯॥

સૂર્યાન્તરસ્થિતં સામ્બં વિશ્વજાતં ચ પશ્યતિ ।
દ્વિલોચનાશ્ચ ભક્ત્યૈવ તં પશ્યન્તિ મહેશ્વરમ્ ॥ ૫૦॥

અભક્તિયુક્તા યૂયં હિ સહસ્રાક્ષં ન પશ્યથ ।
સ એવ મૃડદીશો ભક્તિયુક્તં ચ માં શિવઃ ॥ ૫૧॥

નમો અસ્તુ નીલગ્રીવાય સહસ્રાક્ષાય મીઢુષે ।
અતોઽસ્ય ભક્તાન્ દેવસ્ય સાષ્ટાઙ્ગં પ્રણમામ્યહમ્ ॥ ૫૨॥

પ્રાજ્યં વિજયં ધનુસ્તેન કરોતુ મમ શઙ્કરઃ ।
શિવભક્તાર્ચનપ્રીતો મહાદેવો મહેશ્વરઃ ॥ ૫૩॥

હસ્તે સ્થિતાન્ બાણલિઙ્ગાન્ પાતયિષ્યતિ મત્પરઃ ।
સુમુખઃ શ્રીમહાદેવો મયિ શર્મ દધાતુ વૈ ॥ ૫૪॥

તીક્ષ્ણાગ્રાણિ શરણં માં શરણં પુરતઃ સ્થિતમ્ ।
દૃષ્ટ્વા સ્વભક્તં શરધૌ વીર્યધઃ પાતયિષ્યતિ ॥ ૫૫॥

મીઢુષ્ટમસ્ય યા હસ્તે હેતિઃ સંહરણોચિતા ।
કપર્દિનો ધનુર્યત્ર વિશલ્યા સા ભવેન્મયિ ॥ ૫૬॥

બાણબાણાસનૈર્હીનં બાહુભ્યાં પાલયેત્સમામ્ ।
અનાતતાય દેવાય ધૃષ્ણવેચ નમોનમઃ ॥ ૫૭॥

નમો હિરણ્યબાહવે સેનાન્યે ચ નમોનમઃ ।
દિશાં ચ પતયે તસ્મૈ વૃક્ષાણાં પતયે નમઃ ॥ ૫૮॥

હરિકેશાય શાન્તાય પશૂનાં પતયે નમઃ ।
ભવન્તઃ પશવો દેવા ભવતાં પતિરીશ્વરઃ ॥ ૫૯॥

તન્માયાપાશબદ્ધા હિ ભવન્તો મોહમાસ્થિતાઃ ।
અનેન હયમેધેન સદક્ષાઃ પૂજયન્તુ વઃ ॥ ૬૦॥

સર્વથા ભવપાશેભ્યો મુક્તા યૂયં ભવિષ્યથ ।
સસ્પિઞ્જરાય નમસ્તસ્મૈ નમસ્તે અસ્ત્વિષીમતે ॥ ૬૧॥

પત્તીનાં પતયે તસ્મૈ બભ્રુશાય નમો નમઃ ।
વિવ્યાધિને તથાન્નાનાં તસ્મૈ સુપતયે નમઃ ॥ ૬૨॥

હરિકેશાય શાન્તાય નમસ્તે ઉપવીતિને ।
પુષ્ટાનાં પતયે તસ્મૈ ભવહેત્યૈ નમો નમઃ ॥ ૬૩॥

જગતાં પતયે તસ્મૈ રુદ્રાયૈવાતતાયિને ।
ક્ષેત્રાણાં પતયે તસ્મૈ નમઃ સૂતાય હન્તવે ॥ ૬૪॥

વનાનાં પતયે તસ્મૈ રોહિતાય નમો નમઃ ।
નમઃ સ્થપતયે તુભ્યં વૃક્ષાણાં પતયે નમઃ ॥ ૬૫॥

મન્ત્રિણે વાણિજાયાથ કક્ષાણાં પતયે નમઃ ।
નમો ભુવન્તયે તસ્મૈ વારિવસ્કૃતયાય ચ ॥ ૬૬॥

ઓષધીનાં ચ પતયે ઉચ્ચૈર્ઘોષાય ક્રન્દતે ।
પત્તીનાં પતયે તસ્મૈ કૃત્સ્નવીતાય ધાવતે ॥ ૬૭॥

સત્વાનાં પતયે તસ્મૈ કકુભાય નિષઙ્ગિણે ।

સેનાનાં પતયે તસ્મૈ નમસ્તસ્મૈ નિચેરવે ॥ ૬૮॥

નમઃ પરિચરાયાથ અરણ્યપતયે નમઃ ।
કવિભ્યો જિઘાંસુભ્યો મુષ્ણતાં પતયે નમઃ ॥ ૬૯॥

અસિમદ્ભ્યો નક્તઞ્ચરદ્ભ્યઃ પ્રકૃન્તપતયે નમઃ ।
ઉષ્ણીષિણે ગિરિચરાય કુલિઞ્ચપતયે નમઃ ॥ ૭૦॥

સહમાનાય વિવ્યાધિને આવ્યાધપતયે નમઃ ।
ઇષુમદ્ભ્યો ધન્વાવિદ્ભ્યો આતન્વદ્ભ્યો નમોનમઃ ॥ ૭૧॥

સ્થાયૂનાં પતયે તુભ્યં નિચેરુપતયે નમઃ ।
નમઃ પ્રતિદધાનેભ્ય આચ્છદ્ભ્યો નમો નમઃ ॥ ૭૨॥

વિસૃજદ્ભ્યો નમો નિત્યં સ્વપદ્ભ્યશ્ચ નમો નમઃ ।
જાગ્રદ્ભ્યશ્ચ નમો મેઽસ્તુ તિષ્ઠદ્ભ્યશ્ચ નમોનમઃ ॥ ૭૩॥

નમઃ સભાધિપતયે સભાભ્યસ્તે નમો નમઃ ।
અશ્વેભ્યશ્ચ નમસ્તેઽસ્તુ અશ્વાધિપતયે નમઃ ॥ ૭૪॥

નમ આવ્યાધિનીભ્યસ્તે વિવિધ્યન્ત્યૈ નમો નમઃ ।
ઉગણાભ્યો નમસ્તેઽસ્તુ નમસ્તે અસ્તુ તૃંહતે ॥ ૭૫॥

ગૃત્સેભ્યોઽથ નમસ્તેઽસ્તુ ગૃત્સાધિપતયે નમઃ ।
વિરૂપેભ્યો નમસ્તેઽસ્તુ વિશ્વરૂપાય તે નમઃ ॥ ૭૬॥

મહદ્ભ્યઃ ક્ષુલ્લકેભ્યસ્તે ગણેભ્યો નમો નમઃ ।
તક્ષભ્યો રથકારેભ્યસ્તે કુલાલેભ્યો નમો નમઃ ॥ ૭૭॥

કર્મારિભ્યો નમસ્તેઽસ્તુ પુઞ્જિષ્ઠેભ્યો નમો નમઃ ।
નિષાદેભ્યો નમસ્તેઽસ્તુ ઇષુધન્વકૃતે નમઃ ॥ ૭૮॥

મૃગયુભ્યઃ શ્વનિભ્યશ્ચ શુનાં ચ પતયે નમઃ ।
નમો ભવાય રુદ્રાય શર્વાય પશુપાય ચ ॥ ૭૯॥

નીલગ્રીવાય ચ નમઃ શિપિવિષ્ટાય તે નમઃ ।
નમઃ કપર્દિને તુભ્યં વ્યુપ્તકેશાય તે નમઃ ॥ ૮૦॥

સહસ્રાક્ષાય તે નિત્યં નમસ્તે શતધન્વને ।
નમસ્તે ગિરિશાયાથ શિપિવિષ્ટાય તે નમઃ ॥ ૮૧॥

નમો મીઢુષ્ટમાયાથ તથા ચેષુમતે નમઃ ।
નમો હ્રસ્વાય બૃહતે તથા વર્ષીયસે નમઃ ॥ ૮૨॥

સંવૃધ્વને ચ વૃદ્ધાય અગ્ર્યાય પ્રથમાય ચ ।
આશુષેણાય ચ નમસ્તથૈવાશુરથાય ચ ॥ ૮૩॥

નમઃ શૂરાય દેવાય નમસ્તે અવભિન્દતે ।
વર્મિણે તે નમો નિત્યં નમસ્તેઽસ્તુ વરૂથિને ॥ ૮૪॥

બિલ્મિને તે નમો નિત્યં દંસનાઙ્ગાય તે નમઃ ।
શ્રુતાય શ્રુતસેનાય દુન્દુભ્યાય નમો નમઃ ॥ ૮૫॥

આહનન્યાય ચ નમો ધૃષ્ણવે પ્રમૃશાય ચ ।
દૂતાય પ્રહિતાયાથ નમસ્તેઽસ્તુ નિષઙ્ગિણે ॥ ૮૬॥

વરેષુધિમતે તુભ્યં નમસ્તીક્ષ્ણેષવે હર ।
નમ આયુધિને તુભ્યં સ્વાયુધાય નમો નમઃ ॥ ૮૭॥

સુધન્વને નમસ્તુભ્યં સ્તુત્યપથ્યાય તે નમઃ ।
નમઃ કાટ્યાય નીપ્યાય નમઃ સૂદ્યાય તે નમઃ ॥ ૮૮॥

રજસ્યાય ચ નાદ્યાય વૈશન્તાય નમો નમઃ ।
અવટ્યાય ચ કૂપ્યાય વર્ણ્ય વર્ષ્યાય તે નમઃ ॥ ૮૯॥

આશવેચાજિરાયાથ શીઘ્રય શીભ્યાય તે નમઃ ।
પ્રતિસૂર્યાય સ્વલ્પાય નમઃ શ્લોક્યાય તે નમઃ ॥ ૯૦॥

અવસાન્યાય ચ નમો વન્યકક્ષ્યાય તે નમઃ ।
શ્રવપ્રતિશ્રવાયાથ આશવે ચાજિરાય ચ ॥ ૯૧॥

નમઃ શીઘ્યાય શીભ્યાય ઉર્વર્યાય ચ તે નમઃ ।
સ્રોતસ્યાય ચ દ્વીપ્યાય કનિષ્ઠજ્યેષ્ઠકાય તે ॥ ૯૨॥

પૂર્વાપરભવાયાથ મધ્યમાય નમો નમઃ ।
અપગલ્ભાય બુધ્યાય સૌમ્યયામ્યાય તે નમઃ ॥ ૯૩॥

પ્રતિસર્યાય ચ ખલ્યાય ક્ષેમ્યાય ચ નમો નમઃ ।
નમઃ સોમાય રુદ્રાય તામ્રાય અરુણાય ચ ॥ ૯૪॥

નમઃ શઙ્ગાય શાન્તાય પશૂનાં પતયે નમઃ ।
નમ ઉગ્રાય ભીમાય નમો અગ્રેવધાય ચ ॥ ૯૫॥

નમો દૂરેવધાયાથ હન્ત્રે તુભ્યં હનીયસે ।
સારાય પ્રણવાયાથ શમ્ભવે ચ મયોભુવે ॥ ૯૬॥

નમસ્તે શઙ્કરાયાથ નમો મયસ્કરાય ચ ।
નમઃ શિવાય શાન્તાય નમઃ શિવતરાય ચ ॥ ૯૭॥

નમસ્તીર્થ્યાય કૂલ્યાય પાર્યવાર્યાય તે નમઃ ।
નમઃ પ્રતરણાયાથ નમશ્ચોત્તરણાય ચ ॥ ૯૮॥

આતાર્યાય ચ લાદ્યાય નમઃ ફેન્યાય તે નમઃ ।
સિકન્ત્યાય પ્રવાહ્યાય હિરણ્યપ્રપથાય ચ ॥ ૯૯॥

નમઃ કિm+શિલાયાથ ક્ષયણાય કપર્દિને ।
નમો ગોષ્ઠ્યા ગૃહ્યાય પુલસ્ત્યાય નમોઽસ્તુ તે ॥ ૧૦૦॥

નિવેષ્પ્યાય નમસ્તુભ્યં પાm+સવ્યાય તે નમઃ ।
નમઃ શુષ્કાય દેવાય હરિત્યાય નમો નમઃ ॥ ૧૦૧॥

નમો લોપ્યાય ઉલપ્યાય ઉર્વ્યસૂર્મ્યાય તે નમઃ ।
પર્ણાય પર્ણશદ્યાય ગુરમાણાય તે નમઃ ॥ ૧૦૨॥

નમો અભિઘ્નતે તુભ્યં નમ અખિતતે નમઃ ।
નમઃ પ્રિખિદતે તુભ્યં કિરિકેભ્યો નમો નમઃ ॥ ૧૦૩॥

દેવાનાં હૃદયેભ્યસ્તે વિક્ષીણેભ્યો નો નમઃ ।
નમો વિચિન્વત્કેભ્યસ્તે આમીવત્કેભ્ય એવ ચ ॥ ૧૦૪॥

દ્રાપેકવચયુક્તાય અન્ધસસ્પતયે નમઃ ।
દારિદ્યદારિણે તુભ્યં નમસ્તે નીલલોહિત ॥ ૧૦૫॥

નમસ્તે નવસે તુભ્યં ક્ષયદ્વીરાય તે નમઃ ।
નમસા ત્વાં વિધેમાદ્ય શિવાં તાં તનુવં શિવ ॥ ૧૦૬॥

ઘોરા શાન્તા તનુસ્તેઽદ્ય પ્રપદ્યે તનુવૌ શિવ ।
ઘોરા તેઽદ્ય તનુર્વહ્નિઃસર્વયજ્ઞેષુ પૂજ્યતે ॥ ૧૦૭॥

નમસ્કારેણ તન્વં તે પ્રયામિ શરણં હર ।
રુદ્રો વા એવ યત્રાપિ યજુર્ભિઃ પ્રવદામ્યહમ્ ॥ ૧૦૮॥

અહં પ્રતિપદૈર્મન્ત્રૈસ્તદ્રૂપાન્ રુદ્રસત્તમાન્ ।

નમસ્કરોમિ તદ્ભક્તાન્ પૃથિવ્યપ્સુ સદોગણાન્ ॥ ૧૦૯॥

દિવ્યન્તરિક્ષતીર્થસ્થાન્ વાતવર્ષશરાનહમ્ ।
અભક્તાન્ દેવદેસ્ય રુદ્ર જમ્ભે દધામ્યહમ્ ॥ ૧૧૦॥

યો રુદ્રો અગ્નિમધ્યસ્થો યો અપ્સ્વોષધિસ્થિતઃ ।
યો રુદ્રો વિશ્વમધ્યસ્થસ્તસ્મૈ સર્વાત્મને નમઃ ॥ ૧૧૧॥

હિરણ્યબાહુર્દેવો યો હિરણ્યતનુરીશ્વરઃ ।
અમ્બિકાયાઃ પતિં શમ્ભુરુમાયાઃ પતિરીશ્વરઃ ॥ ૧૧૨॥

યજ્ઞેષુ તદ્વિઃશેષં શિવલિઙ્ગે પુરઃસ્થિતમ્ ।
તદશ્યામ તવાદ્યૈવ યન્નિવેદિતમીશ્વરે ॥ ૧૧૩॥

સ્તનન્ધયં મહાન્તં મે ગાવોઽશ્વાઃ પુરુષા મમ ।
મા વધીસ્તં મહાદેવ માં પાહિ તનુવો મમ ॥ ૧૧૪॥

કૃત્તિં વાસનો હસ્તે ત્વં બિભ્રાણં ચ ધનુર્વરમ્ ।
આગચ્છ દેવ દેવેશ શરણં મામવ પ્રભો ॥ ૧૧૫॥

નમસ્તે હર દેવેશ રોચિષે શોચિષે નમઃ ।
યત્ર ત્વં વસસીશાનો નમો યત્ર નિષીદસિ ॥ ૧૧૬॥

તસ્યાર્દ્રાપ્રાર્થિતં ઋક્ષં શ્રેષ્ઠોઽયં ચ ગવાં પતિઃ ।
નમસા તં પ્રપન્નોઽસ્મિ સર્વદા શિવમેવ હિ ॥ ૧૧૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે યજુર્વેદકૃતા શિવસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઈશાખ્યઃ દ્વાદશમાંશઃ । અધ્યાયઃ ૩ ઋગ્વેદયજુર્વેદકૃતસ્તુતિઃ । ૩૧.૨-૧૧૭ ॥

- .. shrIshivarahasyam . IshAkhyaH dvAdashamAMshaH . adhyAyaH 3 RRigvedayajurvedakRRitastu
. 31.2-117 ..

Notes:

Yajurveda યજુર્વેદ; delivers at the site of DakṣaYajña દક્ષયજ્ઞ, a eulogy in favor of Śiva શિવ.

Proofread by Ruma Dewan

*Yajurvedakrita Shiva Stuti*

pdf was typeset on December 28, 2024

Please send corrections to *sanskrit@cheerful.com*